# गुरु पादुका पंचक

ॐ नमो गुरुभ्यो गुरु पादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः।
आचार्य सिद्धेश्वर पादुकाभ्यो नमो नमः श्री गुरुपादुकाभ्यः॥ (१)

ऐंकार ह्रींकार रहस्ययुक्त श्रींकारगूढार्थ महाविभूत्या।
ॐकारमर्मप्रतिपादिनीभ्यां नमो नमः श्री गुरुपादुकाभ्य:॥ (२)

होत्रग्नि होत्राग्निहविष्यहोतृ होमादिसर्वाकृति भासमानम्।
यद् ब्रह्म तद्वेधवितारिणीभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥ (३)

कामादिसर्पव्रजगारुडाभ्यां विवेक वैराग्य निधिप्रदाभ्याम्।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥ (४)

अनन्त संसारसमुद्रतार नौकायिताभ्यां स्थिरभक्तिदाभ्याम्।
जाड्याब्धिसंशोषणवाडवाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥ (५)

**जय गुरु देव**